# शाब्दबोधः

डॉ. कुलदीपशर्मा
सहायकाचार्यः
राष्ट्रियसंस्कृतसंस्थानम्,
जयपुरपरिसरः, जयपुरम्

# शाब्दबोधः

शब्दात् जातः इति शाब्दः । शब्दजन्यः इत्यर्थः । बोधो नाम ज्ञानम्। शब्दश्चासौ बोधश्च शाब्दबोधः । शब्दजन्यम् अर्थज्ञानम् इत्यर्थः । अत्र शब्दपदेन वाक्यं गृह्यते । वाक्यं नाम परस्परसाकाङ्क्षः क्रियान्वितः पदसमूहः । आकाङ्क्षा नाम एकपदार्थज्ञाने जाते अस्य अन्वयार्थः कः ? इत्येवंरूपा जिज्ञासा। यथा – कुम्भकारः घटम् आनयति इत्येकं वाक्यम् । अत्र कुम्भकारः इत्युक्तौ – सः किं करोति? इति जिज्ञासा भवति । सा च आनयति इति क्रियापदेन निवर्तते । पुनश्च – कम् आनयति ? इत्याकाङ्क्षा घटम् इत्यनेन पूर्यते । एवम् घटम् इत्युक्तौ आनयति इत्युक्तौ च अन्यार्थयोराकाङ्क्षा जायते । यत्र जलम् इत्येकं पदं प्रयुज्यते तत्रापि देहि त्वम् इति अध्याहारः । अत एव पदसमूह एव वाक्यमित्युक्तम् । यत्र पचत इत्येकं पदं तत्र भोजनम् इति अध्याहारः । अत एव पदसमूहो वाक्यमित्युक्तम् । एवञ्च शाब्दबोधो नाम वाक्यार्थज्ञानमित्युक्तं भवति। परस्परं विशेष्यविशेषणभावमापन्नाः पदार्थाः शाब्दबोधे गोचरीभवन्ति ।

# शाब्दबोधस्य सहकारिकारणानि

- आकाङ्क्षा — अर्थान्तरजिज्ञासा
- योग्यता — परस्परान्वयप्रयोजकधर्मः
- आसत्तिः — सन्निधानम्
- तात्पर्यम् — प्रयोक्तुरिच्छा

# शाब्दबोधे क्रिया

गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।

**बुद्ध्या प्रकल्पिताभेदः** क्रियेति व्यपदिश्यते।।

व्यापारो भावना सैवोत्पादना सैव च क्रिया।

साध्यत्वेनाभिधीयमानो व्यापारविशेषः क्रिया



# शाब्दबोधः

ननु कस्तावच्छाब्दबोध इति पदार्थ इत्युच्यते सारल्येन –

एकपदार्थे परपदार्थविषयकं ज्ञानं शाब्दबोधः

वैयाकरणानां मते अष्टप्रकारकाः स्फोटाः स्वीक्रियन्ते

1. वर्णस्फोटः
2. पदस्फोटः
3. वाक्यस्फोटः
4. अखण्डपदस्फोटः
5. अखण्डवाक्यस्फोटः
6. वर्णजातिस्फोटः
7. पदजातिस्फोटः
8. वाक्यजातिस्फोटः

एतेषु स्फोटेषु वाक्यस्फोटो मुख्यः, तस्यैवार्थबोधकत्वाल्लोके तेनैवार्थसमाप्तेश्च ।

# शाब्दबोधः

यद्यपि वाक्यस्फोटो मुख्यः वाक्येनैवार्थपरिसमाप्तिर्भवति तेनैवाकांक्षानिवृत्तेश्च तथापि प्रतिवाक्यं सङ्केतग्रहोऽसम्भवः तथा वाक्यस्य अन्वाख्यानं लघुना उपायेन कर्तुम् असौकर्यं वर्तते अतः वाक्ये पदानि विभज्य पदेष्वपि प्रकृतिप्रत्ययौ प्रविभज्य तत्तत्प्रकृतिप्रत्ययानाम् अर्थावबोधनद्वारा एव वाक्यस्यापि अर्थावबोधो जायते । मीमांसकाः वैयाकरणाश्च शाब्दबोधे आख्यातार्थस्य प्राधान्यमामन्वाते गौतमीयाश्च प्रथमान्तार्थस्य। शाब्दबोधस्येयं वार्ता अस्माभिः श्रीमता आचार्यकौण्डभट्टेन विरचितस्य वैयाकरणभूषणसार इति ग्रन्थस्य धात्वर्थप्रकरणस्य प्रथमकारिकाम् आश्रित्य प्रारभणीया। तत्राचार्येण लिखितम् –

**फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।**

**फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥**

# कारिकार्थः- वैयाकरणानां नये-

## 1. धात्वर्थः- फलव्यापारयोर्धातुः-

फलस्य व्यापारस्य च वाचकः धातुरिति भवति अर्थात् धातुना फलव्यापारावुच्येते।

## 2. आख्यातार्थः(तिङर्थः) - आश्रये तु तिङः स्मृताः

फलाश्रयस्य (कर्मणः) तथा व्यापाराश्रयस्य (कर्तुः) वाचकाः तिङप्रत्यया भवन्ति अर्थात् तिङ्प्रत्ययैः कर्ता कर्म चोच्येते।

## 3. शाब्दबोधः- फले प्रधानं व्यापारः तिङर्थस्तु विशेषणम्।

फलं प्रति व्यापारस्य प्राधान्यं भवति अर्थात् धातोर्यद्यपि फलव्यापारौ वाच्यौ भवतस्तथापि व्यापारांशस्य प्राधान्यात् स प्रधानः। फलांशस्तत्र ( व्यापारांशे) विशेषणमेव। तिङर्थाः (कर्तृ-कर्म-संख्या-कालाः) अपि तत्र विशेषणमेव।

एवं रीत्या "देवदत्तः ओदनं पचति" इति वाक्येपचति इति पदे पच् ति इति प्रकृतिप्रत्ययौ स्तः। तत्र पच् इति प्रकृत्याम् विक्लतिः इति फलरुपः अधिश्रयणादिरुपो व्यापारश्च सन्निविष्टौ स्तः। एवं पच् इत्यस्यार्थो भवति विक्लतिजनको व्यापारः।विक्लितेराश्रयात् ओदन इत्यस्य कर्मसंज्ञा तथा अधिश्रयणादिव्यापाराश्रयत्वात् देवदत्तस्य कर्तृसंज्ञा भवति। प्रत्ययभूतस्य ति इत्यस्यार्था सन्ति कर्तृ-कर्म-एकत्वद्वित्वबहुत्वादिसंख्या-भूतवर्तमानभविष्यत्कालाः। अत्र आख्यातार्थभूते कर्तरि देवदत्तोऽभेदसंसर्गेण आख्यातार्था संख्या च समवायसम्बन्धेन अन्वितः। आख्यातार्थभूतः कर्ता कर्तृत्वसम्बन्धेन आख्यातार्थः कालः स्वरूपसम्बन्धेन तथा ओदननिष्ठा विक्लतिः जनकत्वसम्बन्धेन व्यापारे विशेषणानि भवन्ति। संख्या कर्तृप्रत्यये कर्तरि कर्मप्रत्यये च कर्मणि विशेषणत्वेन अन्वितो भवति। कालश्च विशेषणत्वेन व्यापारे अन्वितो भवति।

## वैयाकरणास्तु धात्वर्थमुख्यविशेष्यकं शाब्दबोधम् उररीकुर्वन्ति।

1. चैत्रो ग्रामं गच्छति इत्यत्र उत्तरदेशसंयोगानुकूलव्यापारो गमेरर्थः। ग्रामनिष्ठसंयोगानुकूलः चैत्राभिन्नकर्तृनिष्ठः वर्तमानकालिकः व्यापारः इति बोधः।
2. घटं जानाति इत्यत्र ज्ञानानुकूलः आत्ममनःसंयोगरूपव्यापारो धात्वर्थः। ज्ञानं विषयतासम्बन्धेन घटे वर्तते। घटविषयकज्ञानानुकूलः आत्ममनःसंयोगरूपव्यापारः इत्यर्थः।
3. धान्येन धनवान् इत्यत्र अभेदः तृतीयार्थः। अस्ति इति अध्याहारः। धान्याभिन्नधनवत्पुरुषनिष्ठसत्ता इति बोधः।
4. विप्राय गां ददाति – स्वस्वत्वध्वंसपूर्वकपरस्वत्वानुकूलव्यापारो दाधात्वर्थः। उद्देश्यत्वं चतुर्थ्यर्थः। गोरूपकर्मणः आश्रयतासम्बन्धेन परस्वत्वशब्दे विद्यमाने स्वत्वरूपफले अन्वयः। गोवृत्तिस्वस्वत्वध्वंसपूर्वकविप्रस्वत्वानुकूलः विप्रोद्देश्यको व्यापारः इति बोधः।
5. वृक्षात् पर्णं पतति इत्यत्र अवधित्वं पञ्चम्यर्थः। अधोदेशसंयोगानुकूलः संयोगसमानाधिकरणव्यापारो पतधात्वर्थः।

## शाब्दबोध एवं जायते –

- देवदत्तः-देवदत्ताभिन्नैककर्तृकः
- ओदनम् - ओदनकर्मकः
- पचति- वर्तमानकालिकः विक्लतिजनकः व्यापारः ।

प्राचीनाः फलविशिष्टव्यापारम् धात्वर्थमामन्वते अतस्तेषां नये कर्तृवाच्यं स्याद् वा कर्मवाच्यं उभयत्र प्राधान्यं व्यापारस्यैव । अत एवं व्यापारमुख्येविशेष्यकश्शाब्दबोध एषां मते भवति ।

नव्याः वैयाकरणास्तु धातोः फले व्यापारे च खण्डशः शक्तिं स्वीकुर्वते । अतस्तेषां मते कर्तृवाच्यभूतायां क्रियायां व्यापारमुख्यविशेष्यको बोधः कर्मवाच्यभूतायां क्रियायां च फलमुख्यविशेष्यको बोधः भवति । तेन देवदत्तः ओदनं पचति – देवदत्ताभिन्नैककर्तृकः ओदनकर्मकः वर्तमानकालिकः विक्लत्यनुकूलो व्यापारः इति बोधस्तथा च देवदत्तेन ओदनः पच्यते इत्यत्र देवदत्तवृत्तिवर्तमानकालिकव्यापारजन्या ओदननिष्ठा विक्लतिः इति बोधश्च जायते ।

# गौतमीयास्तत्रैवम् –

- **धात्वर्थः- फलव्यापारौ**
- **आख्यातार्थः- कृतिः (यत्नः)**
- **शाब्दबोधः- प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोधः।**

तेषाम्मते विक्लतिरूपं यत् फलं तदाश्रयत्वेन ओदने वर्तते। तदोदननिष्ठायाः विक्लतेर्जनको यो व्यापारः कृतिजन्यः। सा च कृतिः आश्रयत्वेन देवदत्तेन अन्वेति। एवं रीत्या देवदत्तः ओदनं पचति इति वाक्यस्य शाब्दबोध एवं जायते –

- ओदनकर्मक विक्ल्यनुकूलव्यापारानुकूलकृतिमान् देवदत्तः

अत्र ओदनकर्मिका या विक्लतिः सा अनुकूलत्वसम्बन्धेन व्यापारे तथा च व्यापारः अनुकूलत्वसम्बन्धेन कृतौ कृतिश्चाश्रयत्वसम्बन्धेन देवदत्ते अन्विता भवति।

प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोधः इति नैयायिकाः ।

कर्तृत्वं नाम कृतिः । कृतिः नाम यत्नः, न तु व्यापारः । धातोः तु फलं व्यापाराश्च अर्थः । तिङर्थस्य कृतेः आश्रयतासम्बन्धेन प्रथमान्तार्थे अन्वयः । चैत्रः तण्डुलं पचति इत्यत्र तण्डुलनिष्ठविक्लित्त्यनुकूलव्यापारसहितकृत्याश्रयः चैत्रः इति शाब्दबोधम् आहुः । कर्मणि प्रयोगे तु तिङर्थः कर्मत्वम् । कर्मत्वञ्च फलाश्रयत्वम् । फलस्य धातुलभ्यत्वेन आश्रयत्वमेव तिङर्थः इति पर्यवस्यति । चैत्रेण पच्यते ओदनः इत्यत्र चैत्रनिष्ठकृतिजन्यव्यापारजन्यविक्लित्त्याश्रयः ओदनः इति बोधः ।

# मीमांसकास्तत्रैवम् –

## भावनाविशेष्यकः शाब्दबोधः इति मीमांसकाः ।

1. धात्वर्थः- फलमेव
2. आख्यातार्थः- व्यापारः
3. शाब्दबोधः- व्यापारमुख्यविशेष्यकः शाब्दबोधः

देवदत्तः ओदनं पचति - देवदत्ताभिन्नैककर्तृकः ओदनकर्मकः वर्तमानकालिकः विक्लत्यनुकूलो व्यापारः ।

यद्यपि व्यापारस्यविशेष्यता एतेषाम्मतेऽपि अस्ति तथापि स व्यापारः प्रत्ययार्थभूतोऽस्ति न धात्वर्थभूतः । एवं शाब्दबोधप्रसङ्गे एते व्यापारविशेष्यतायां वैयाकरणैः सह साम्यं धात्वर्थविषये वैषम्यमावहन्ति ।